२. सामान्यवेदान्त-उपनिषदः

अद्वैतोपनिषत्

ॐ अद्वैतपुरुषस्य न द्वितीयो भेदोऽस्ति। स्थिरजंगममध्ये अद्वैतं ब्रह्म प्रकाशितम्। सर्वलोकमध्ये ब्रह्म द्विधारूपं विचरति। चैतन्यचित्तेजसः अन्तरात्मा। मध्ये कैवल्यात्मा। एकैकं यथा रवितेजः रविर्भवेत् तथा अखण्डितब्रह्म मायाजगत्त्रयं अवस्थात्रयं परमात्मनः एकं भवति। या बुद्धिर्गर्भमध्ये सा बुद्धिर्बाल्यावस्था न भवति। या बुद्धिर्बाल्यावस्था भवति सा बुद्धिर्यौवनावस्था न भवति। या बुद्धिर्यौवनावस्था सा बुद्धिर्यूनावस्था न भवति। जरावस्था कालसंप्रीकामेवधर्मक्रीयते कारणं तत्त्वज्ञानं भवति। ज्ञानप्रबोधो यस्मिन्मध्ये मायामोहं परित्यज्य सर्वकर्मविनिर्मुक्तः स शब्दातीतोऽपि जायते। अथेतोऽपि अद्वैतपुरुषस्य पूर्णं ब्रह्म प्रतिभासितम्। यथा नदी जायते सागर एकोऽपि सागरप्रतिभासितः तथा ब्रह्म सर्वान्तरान्मा मध्ये प्रकाशितम्। नाप्रसं संपुटं सत्त्वरजस्तमोगुणरहितं तत्त्वं चेति। यथा योगी वायुनिरोधनं उक्ताचरणगुरुराछिनोति किल्बिषम्। सर्वदिव्यदेहमध्ये परमात्मा प्रकाशितः विनिर्मुक्तभवसागरः स्वर्गे देवमध्ये उत्तमस्वल्पस्य बुद्धिप्रकाशः अस्मिन्मध्ये मायामोहं परित्यजेत्। प्रकाशमध्ये

माया करोति। तैलमध्ये यथा यथा मक्षिका एकदेहिमध्ये ब्रह्म दशधा रूपं विचरति। चक्षुःप्राणमनोबुद्धिपञ्चेन्द्रियाणि पञ्चतत्त्वानि तथा घटघट-मध्ये बहुचन्द्रोऽपि दृश्यते प्रकाशितः सर्वलोकमध्ये ब्रह्मणो रूपं विचरति तथा घटघटमध्ये बहुचन्द्रोऽपि दृश्यते। अद्वैतं कथितं येन पुरुषोऽमूढो भवति। देवासुरमुनिमनुष्याणां अधः ऊर्ध्वं चतुर्दिशम्। भुवर्णायुदेवादाव्य-देहितेरसकारो दृश्यते रसकाराकारमध्ये भवति निराकारः अकारउकार-मध्ये ब्रह्म परिपूर्ण सत्यसत्यं वेदवाक्यं वेदशास्त्रप्रतिभासितं कैवल्यं द्वैताद्वैतरहितं मनोमय आनन्दमयतत्त्वमयतेजोमयसर्वमयः विष्णुवृक्ष-फलं उत्पन्नं परमहंसपूर्णोऽपि जायते। ज्ञानं माता विज्ञानं पिता सगुणब्रह्म निर्गुणब्रह्मार्पितं अष्टमी च निर्गुणावस्था ब्रह्म शरीरज्ञानलहरी ब्रह्मणः। ब्रह्मणो यज्ञोपवीतमनिष्टं गंभीरग्रहे क्षेमसर्ववैराग्यप्रभावेन सन्तोषलाभ-समस्तगुणोऽपि जायते। परमहंसपुरुषस्य द्वितीयं भेदं यथा जलरहिते भिन्नं प्राणप्रीतेयन्। द्वितीयवस्तुरहितः अखण्डितं वस्तु मध्ये प्रविष्टं अर्धस्थाने अर्धमृचस्थाने आत्मा दृश्यते आत्मव्यापकं ब्रह्मज्ञानविज्ञानम्॥ १०

इति अद्वैतोपनिषत् संपूर्णा
